ऽसौन्नराधिप!। जज्ञिरे वसवस्त्वष्टौ गङ्गायां शान्तनोः सुताः। वशिष्ठस्य च शापेन नियोगाद्वासवस्य च। तेषामवरजो भीष्मः कुरूणामभयङ्करः। मतिमान्वेदविद्वाग्मी शत्रुपक्षक्षयङ्करः। जामदग्न्येन रामेण सर्वास्त्रविदुषां वरः। योऽयुध्यत महातेजा भार्गवेण महात्मना। यस्तु राजन्! कृपोनाम ब्रह्मर्षिरभवत् क्षितौ। रुद्राणान्तु गणाद्विद्धि संभूतमतिपौरुषम्। शकुनिर्नाम यस्त्वासीद्राजा लोके महारथः। द्वापरं विद्धि तं राजन्! संभूतमरिमर्द्दनम्। सात्यकिः सत्यसन्धश्च योऽसौ वृष्णिकुलोद्वहः। पक्षात् स जज्ञे मरुतां देवानामरिमर्द्दनः। द्रुपदश्चैव राजर्षिस्तत एवाभवद्गणात्। मानुषे नृप! लोकेऽस्मिन् सर्वशस्त्रभृतांवरः। ततश्च कृतवर्म्माणं विद्धि राजन्!! जनाधिपम्। तमप्रतिमकर्म्माणं क्षत्त्रियर्षभसत्तमम्। मरुतान्तु गणाद्विद्धि सञ्जातमरिमर्द्दनम्। विराटं नाम राजानं परराष्ट्रप्रतापनम्। अरिष्टायास्तु यः पुत्त्रो हंस इत्यभिविश्रुतः। स गन्धर्वपतिर्जज्ञे कुरुवंशविवर्द्धनः। धृतराष्ट्र इति ख्यातः कृष्णद्वैपायनात्मजः। दीर्घबाहुर्महातेजाः प्रज्ञाचक्षुर्नराधिपः। मातुर्दोषादृषेः कोपादन्ध एव व्यजायत। तस्यैवावरजो भ्राता महासत्त्वो महाबलः। स पाण्डुरिति विख्यातः सत्यधर्म्मरतः शुचिः। अत्रेस्तु सुमहाभागं पुत्त्रं पुत्त्रवतांवरम्। विदुरं विद्धि तं लोके जातं बुद्धिमतांवरम्। कलेरंशस्तु सञ्जज्ञे भुवि दुर्य्योधनोनृपः। दुर्बुद्धिर्दुर्म्मतिश्चैव कुरूणामयशस्करः। जगतो यस्तु सर्वस्य विद्विष्टः कलिपूरुषः। यः सर्व्वां घातयामास पृथिवीं पृथिवीपते!। उद्दीपितं येन वैरं भूतान्तकरणं महत्। पौलस्त्या भ्रातरश्चास्य जज्ञिरे मनुजेष्विह। शतं दुःशासनादीनां सर्व्वेषां क्रूरकर्मणाम्। दुर्मुखो दुःसहश्चैव ये चान्ये नानुकीर्त्तिताः। दुर्य्योधनसहायास्ते पौलस्त्या भरतर्षभ!। वैश्यापुत्त्रो युयुत्सुश्च धार्त्तराष्ट्रः शताधिकः" इति। "धर्मस्यांशन्तु राजानं! विद्धि राजन्! युधिष्ठिरम्। भीमसेनन्तु वातस्य देवराजस्य चार्ज्जुनम्। अश्विनोस्तु तथैवांशौ रूपेणाप्रतिमौ भुवि। नकुलः सहदेवश्च सर्व्वभूतमनोहरौ। यस्तु वर्च्चा इति ख्यातः सोमपुत्त्रः प्रतापवान्। सोऽभिमन्युर्बृहत्कीर्त्तिरर्जुनस्य सुतोऽभवत्। यस्यावतरणे राजन्! सुरान्सोमोऽब्रवीदिदम्। नाहं दद्याम्प्रियं पुत्त्रं मम प्राणैर्गरीयसम्। समयः क्रियतामेष न शक्यमतिवर्त्तितुम्। सुरकार्य्यं हि नः कार्य्यमसुराणां क्षितौ बधः। तत्र यास्यत्ययं वर्च्चा नच स्थास्यति वै चिरम्। ऐन्द्रिर्नरस्तु भविता यस्य नारायणः सखा। सोऽर्ज्जुनेत्यभिविख्यातो पाण्डोः पुत्त्रः प्रतापवान्। तस्यायं भविता पुत्त्रो बालो भुवि महारथः। ततः षोड़श वर्षाणि स्थास्यत्यमरसत्तमाः!। अस्य षोड़शवर्षस्य स संग्रामो भविष्यति। यत्रांशा वः करिष्यन्ति कर्म वीरनिसूदनम्। नरनारायणाभ्यां तु स संग्रामो विनाकृतः। चक्रव्यूहं समास्थाय योधयिष्यन्ति वः सुराः। विमुखाञ्छात्रवान् सर्व्वान् कारयिष्यति मे सुतः। बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति। महारथानां वीराणां कदनञ्च करिष्यति। सर्व्वेषामेव शत्रूणां चतुर्थांशं नयिष्यति। दिनार्द्धेन महाबाहुः प्रेतराजपुरं प्रति। ततो महारथैर्व्वीरैः समेत्य बहुशो रणे। दिनक्षये महाबाहुर्मया भूयः समेष्यते। एकं वंशकरं पुत्त्रं वीरं वै जनयिष्यति। प्रनष्टं भारतं वंशं स भूयो धारयिष्यति। एतत् सोमवचः श्रुत्वा तथाऽस्त्विति दिवौकसः। प्रत्यूचुः सहिताः सर्व्वे ताराधिपमपूजयन्। एवं ते कथितं राजंस्तव जन्म पितुः पितुः। अग्नेर्भागन्तु तं विद्धि धृष्टद्युम्नं महारथम्। शिखण्डिनमथो राजन्! स्त्रीपूर्व्वं विद्धि राक्षसम्। द्रौपदेयाश्च ये पञ्च बभूवुर्भरतर्षभ!। विश्वान्देवगणान् विद्धि सञ्जातान् भरतर्षभ!। प्रतिविन्ध्यः सुतसोमः श्रुतकीर्त्तिस्तथाऽपरः। नाकुलिस्तु शतानीकः श्रुतसेनश्च वीर्य्यवान्। शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत्"। सूर्य्यस्य कर्णरूपेणावतारः यथा "प्रकाशकर्त्ता भगवांस्तस्यां गर्भं दधौ तदा। अजीजनत् सुतं चास्यां सर्वशस्त्रभृतां वरम्। सकुण्डलं सकवचं देवगर्भश्रियान्वितम्। दिवाकरसमं दीप्त्या चारुसर्व्वाङ्गभूषितम्। निगूहमाना जातं वै बन्धुपक्षभयात्तदा। उत्ससर्ज्ज जले कुन्ती तङ्कुमारं यशस्विनम्। तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः। राधायाः कल्पयामास पुत्त्रं सोऽधिरथिस्तदा"। "पुरा नाम च तस्यासीद्वसुषेण इति क्षितौ। ततो वैकर्त्तनः कर्णः कर्म्मणा तेन सोऽभवत्। आमुक्तकवचो वीरो यस्तु जज्ञे महायशाः। स कर्ण इति विख्यातः पृथायाः प्रथमः सुतः। स तु सूतकुले वीरो ववृधे राजसत्तम!। कर्णं नरवरश्रेष्ठं सर्वशस्त्रभृतां वरम्। दुर्य्योधनस्य सचिवं मित्त्रं शत्रुविनाशनम्। दिवाकरस्य तं विद्धि राजन्नंशमनुत्तमम्"। "यस्तु नारायणोनाम देवदेवः सनातनः। तस्यांशो मानुषेष्वासीद्वासुदेवः प्रतापवान्। शेषस्यांशश्च नागस्य बलदेवो महाबलः। सनत्कुमारं प्रद्युम्नं विद्धि-